श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे

# ॥ सन्निवेशपद्धतिः पञ्चविंशी ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

# ॥ सन्निवेशपद्धतिः पञ्चविंशी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

अणोरणीयसीं विष्णोः महतोऽपि महीयसीम्।
प्रपद्ये पादुकां नित्यं तत्पदेनैव सम्मिताम् ॥ **25.1** ॥

प्रतितिष्ठति पादसंमितायां
त्वयि नित्यं मणिपादुके ! मुकुन्दः।
इतरे तु परिच्छदास्त एते
विभवव्यञ्जनहेतवो भवन्ति ॥ **25.2** ॥

तव रङ्गनरेन्द्रपादरक्षे !
प्रकृतिः सन्नपि भक्तिपारतन्त्र्यात्।
भवतीं वहतीव पन्नगेन्द्रः
प्रथितस्वस्तिकलक्षणैः शिरोभिः ॥ **25.3** ॥

परस्य पुंसः पदसन्निवेशान्
प्रयुञ्जते भावितपञ्चरात्राः।
अघप्रतीपानपदिश्य पुण्ड्रान्
अङ्गेषु रङ्गेशयपादुके ! त्वाम् ॥ **25.4** ॥

विमृश्य रङ्गेन्द्रपतिंवरायाः
श्रुतेः स्थितां मूर्धनि पादुके ! त्वाम्।

बध्नन्ति वृद्धाः समये वधूनां
    त्वन्मुद्रितान्याभरणानि मौळौ ॥ **25.5** ॥

वहन्ति रङ्गेश्वरपादरक्षे !
    दीर्घायुषां दर्शितभक्तिबन्धाः।
आशाधिपानामवरोधनार्यः
    त्वन्मुद्रिकां मङ्गळहेमसूत्रैः ॥ **25.6** ॥

व्यूहक्रमेण प्रथितारमग्रे
    सन्दर्शयन्तीं मणिपादुके ! त्वाम्।
पातुं त्रिलोकीं पदपद्मभाजं
    सौदर्शनीं शक्तिमवैमि शौरेः ॥ **25.7** ॥

बद्धासिका कनकपङ्कजकर्णिकायां
    मध्ये कृशा मुररिपोर्मणिपादुके ! त्वम्।
सन्दृश्यसे सरसिजासनया गृहीतं
    रूपान्तरं किमपि रङ्गविहारयोग्यम् ॥ **25.8** ॥

मानोचितस्य मदधीनजनस्य नित्यं
    मा भूदतः कृपणतेति विचिन्तयन्त्या।
बन्दीकृतं ध्रुवमवैमि वलग्नदेशे
    कार्श्यं त्वया कमललोचनपादरक्षे ! ॥ **25.9** ॥

मध्ये कृशामुभयतः प्रतिपन्नवृद्धिं
    मन्ये समीक्ष्य भवतीं मणिपादरक्षे !।
नित्यं मुकुन्दपदसङ्गमविप्रयोगौ
    निश्चिन्वते कृतधियः सुखदुःखकाष्ठाम् ॥ **25.10** ॥

रङ्गेशितुश्चरणपङ्कजयोर्भजन्ती
    रक्षाप्रसाधनविकल्पसहामवस्थाम्।

मान्याकृतिर्निर्विशसे मणिपादरक्षे !
    मध्ये परिच्छदविभूषणवर्गयोस्त्वम् ॥ **25.11** ॥

अङ्गान्तरेषु निहितान्यखिलानि कामं
    पर्यायकल्पनसहानि विभूषणानि।
नित्यं मुकुन्दपदपद्मतलानुरूपं
    नैपथ्यमम्ब !  भवती नयनाभिरामम् ॥ **25.12** ॥

ये नाम भक्तिनियतैस्तव सन्निवेशं
    निर्विश्य नेत्रयुगळैर्न भजन्ति तृप्तिम्।
कालक्रमेण कमलेक्षणपादरक्षे !
    प्रायेण ते परिणमन्ति सहस्रनेत्राः ॥ **25.13** ॥

पदमप्रमाणमिति वादिनां मतं
    मधुजित्पदे महति मास्म भूदिति।
व्युदपादि तस्य चरणावनि !  त्वया
    निगमात्मनस्तव समप्रमाणता ॥ **25.14** ॥

अप्रभूतमभवज्जगत्त्रयं
    यस्य मातुमुदितस्य पादुके !।
अप्रमेयममितस्य तत्पदं
    नित्यमेव ननु सम्मितं त्वया ॥ **25.15** ॥

आलवालमिव भाति पादुके !
    पादपस्य भवती मधुद्विषः।
यत्समीपविनतस्य शूलिनः
    सारिणी भवति मौळिनिम्नगा ॥ **25.16** ॥

मोदमानमुनिबृन्दषट्पदा
    भाति मुक्तिमकरन्दवर्षिणी।

काऽपि रङ्गनृपतेः पदाम्बुजे
कर्णिका कनकपादुकामयी ॥ **25.17** ॥

युगपदनुविधास्यन् यौवतं तुल्यरागं
यदुपतिरधिचक्रे यावतो रूपभेदान्।
तदिदमतिविकल्पं बिभ्रती सन्निवेशं
तव खलु पदरक्षे ! तावती मूर्तिरासीत् ॥ **25.18** ॥

तत्तद्वृत्तेरनुगुणतया वामनीं व्यापिनीं वा
प्राप्ते रङ्गप्रथितविभवे भूमिकां सूत्रधारे।
मन्ये विश्वस्थितिमयमहानाटिकां नेतुकामा
नानासंस्था भवति भवती पादुके ! नर्तकीव ॥ **25.19** ॥

माने परं समाने प्रत्यक्षेणागमेनापि।
हरिचरणस्य तवापि तु वैषम्यं रक्ष्यरक्षकत्वाभ्याम् ॥ **25.20** ॥

॥ इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे सन्निवेशपद्धतिः पञ्चविंशी ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥